# Shri Shailakshetre Lakshmivarapradana Varnanam

# શ્રીશૈલક્ષેત્રે લક્ષ્મીવરપ્રદાનવર્ણનમ્

## Document Information

Text title : Shri Shailakshetre Lakshmivarapradana Varnanam

File name : shailakShetrelakShmIvarapradAnavarNanam.itx

Category : shiva, shivarahasya, lakShmI, devii

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 27||

Latest update : June 18, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

Shri Shailakshetre Lakshmivarapradana Varnanam

# શ્રીશૈલક્ષેત્રે લક્ષ્મીવરપ્રદાનવર્ણનમ્

(શિવગૌરીસંવાદે)
ઈશ્વરઃ -
શ્રીશૈલેશોઽહમીશાનિ તત્તુઙ્ગશિખરે સ્થિતઃ ।
બ્રહ્મવિષ્ણ્વાદિભિર્દેવૈર્ગણેન્દ્રૈરપિ સેવિતઃ ॥ ૫૦॥

તત્ર માં નિયમાદ્દૃષ્ટ્વા સર્વપાપૈઃ પ્રમુચ્યતે ।
પુરા શ્રિયા તપસ્તપ્તં તત્ શ્રૃણુષ્વામ્બિકે મુદા ॥ ૫૧॥

યદાઽનઙ્ગો મયા દગ્ધઃ શ્રિયઃ પુત્રો મહેશ્વરિ ।
તેન દુઃખેન સન્તપ્તા ભસ્મરુદ્રાક્ષભૂષણા ॥ ૫૨॥

પઞ્ચાગ્નિનિરતા દેવી પઞ્ચાક્ષરપરાયણા ।
લક્ષ્મીઃ સન્તપદત્યુગ્રં વર્ષાણાં શતકં શિવે ॥ ૫૩॥ (તતાપ તપ અત્યુગ્રં)

દત્તં ચ દર્શનં દેવિ તસ્યાઃ કાલાન્તરે મયા ।
માં દૃષ્ટ્વા નિયતા ગૌરિ તુષ્ટાવ નિયતા તદા ॥ ૫૪॥

લક્ષ્મીઃ -
શર્વરીરમણખણ્ડમૌલિનં શર્વરીકૃતવિહારહારિણમ્ ।
શર્વસર્વપતિમાશ્રયે સદા દૂર્વયા તુ સતતં સમર્ચ્યસે ॥ ૫૫॥

કુમ્ભિકુમ્ભદલનોજ્જ્વલત્પદં કુમ્ભિવક્ત્રવૃતમાન્યપુત્રકમ્ ।
કુમ્ભસમ્ભવમુનીન્દ્રપૂજિતં કુમ્ભિભિન્નટનમીશમાશ્રયે ॥ ૫૬॥

(શિવગૌરીસંવાદે ઈશ્વરઃ -
ઇત્થં સ્તુત્વા હિ માં લક્ષ્મીસ્ત્વામસ્તૌષીત્ તદામ્બિકે ।)
અમરીકબરીભારચઞ્ચરીકૈઃ મુખરિતવેદશિરોભિરીડ્યપાદામ્ ।
સુખકરકિન્નરમૌલિપુષ્પજાલૈઃ ભ્રમરામ્બાં પ્રણતાસ્મિ શઙ્કરીં તામ્ ॥ ૫૭॥

ઇત્થં સ્તુત્વા તદા માં ત્વાં યયાચે વરમુત્તમમ્ ॥ ૫૮॥

અનઙ્ગઃ કોપતસ્તેઽદ્ય ત્વયા દગ્ધો મહેશ્વર ।
સાઙ્ગતાં પ્રાપ્નુયાચ્છમ્ભો એષ દેયો વરો મમ ॥ ૫૯॥

ઈશ્વરઃ -

તદા લક્ષ્મ્યા વચઃ શ્રુત્વા તામવોચં તદામ્બિકે ।
ત્વત્કટાક્ષેણ દેવેશિ પુનરુજ્જીવ્યતાં સ્મરઃ ।
પુત્રીણીયં ભવેલ્લક્ષ્મીઃ સદા મુદિતમાનસા ॥ ૬૦॥

ઇત્થં મદ્વચનાત્ત્વં હિ ત્વત્કટાક્ષોત્થકોણતઃ ।
અનઙ્ગ સાઙ્ગતાં નીતો વિબભૌ સ યથાપુરમ્ ॥ ૬૧॥

ઐક્ષવં કાર્મુકં બિભ્રત્ પુષ્પબાણાંસ્તથાંઽબિકે ।
રત્યા સહ તદા ગૌરિ માં તુષ્ટાવ પ્રહૃષ્ટધીઃ ॥ ૬૨॥

મન્મથઃ -

દુગ્ધાબ્ધિપ્રભવપ્રચણ્ડૌરગક્ષ્વેડવ્યથાસંહૃતૌ
ત્વામેકં દદૃશુર્નિલિમ્પમુખરાઃ સોત્કમ્પગાત્રાઃ શિવમ્ ।
તત્પાનારુણલોલનેત્રયુગલં વીક્ષ્યાકૃતાર્થસ્મિતં
શમ્ભો શઙ્કર શાશ્વતેતિ બહુધા ત્વાં તુષ્ટુવુઃ સુસ્તવૈઃ ॥ ૬૩॥

ઈશ્વરઃ -

ઇત્થં સ્મરેણ દેવેશિ શ્રીશૈલેશઃ સ્તુતોઽસ્મ્યવહમ્ ।
લક્ષ્મીઃ પુત્રં તદા વીક્ષ્ય સાઙ્ગમુદ્યતકાર્મુકમ્ ॥ ૬૪॥

પ્રહૃષ્ટા સાઽભવદ્ગૌરિ વૃતશ્ચાપિ તયા વરઃ ॥ ૬૫॥

લક્ષ્મીઃ -

મન્નામા પર્વતશ્ચાયં ભવત્વદ્ય મહેશ્વર ।
તસ્યૈ દત્તો વરો દેવિ તન્નામખ્યાપનાય મે ॥ ૬૬॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શ્રીશૈલક્ષેત્રે લક્ષ્મીવરપ્રદાનવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૨૭॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 27..

Notes:

Shri Shailam Kshetra came to be known so when Shri (Devi Lakshmi) was graced by Shiva at this place with resurrection of Her son Manmatha (Kamadeva), who had previously been burned to ashes by Shiva. Shri Shailam H Shri - Lakshmi, Shailam - Mountain.
Shri Shailam Kshetra is abode to Shaileshwara Linga (Mallikarjuna Jyotirlinga) having Vibhuti Kunda and the origin of River Krishna near it. Mallikarjuna (Shiva / Shailesha / Shaileshwara) resides here with Bhramaramba (Devi).
Shri Shailam Kshetra is also an abode to Tripurantaka Linga, Ghantakarneshwara Linga (with Sudha Kunda), and Hatakeshwara Linga (with Hataka Kunda).

The shloka numbers have been maintained per the source text.

Proofread by Ruma Dewan

---

*Shri Shailakshetre Lakshmivarapradana Varnanam*
pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*